"विरोधेऽर्थस्तत्परत्वात्" ५सू० "पाठक्रमार्थक्रमयोर्विरोधे अर्थक्रमएव बलीयान् न पाठक्रमः। कुतः? तत्परत्वात् पाठस्यार्थपरत्वात् अर्थार्थत्वात् कार्यसिद्ध्यर्थत्वादित्यर्थः। तेन पूर्वं छेदनम् पश्चात्तया छिन्नया शाखया वत्सापाकरणमिति। अथ यत्र श्रुतेः श्रुतिपाठक्रमस्य च विरोधो भवति तद्यथा "संस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयादिति" (शत०ब्रा०१।७।३।२८) श्रुतिः कर्मणि समाप्ते प्रैषं विदधाति पाठक्रमात्तु स्विष्टकृतः पश्चात् प्राशित्रावदानाच्च पूर्वमिति तत्र केन क्रमेणानुष्ठानमिति? संशये सत्याह" भा० "श्रुतिः क्रमादानुमानिकत्वात्" ६सू० "क्रमादिति श्रुतिपाठक्रमाच्छ्रुतिर्बलीयसी तेन श्रुतिप्रतीतक्रमेणैव संस्थिते कर्मणि प्रैषोच्चारणम् न पाठक्रमेण। कुतः आनुमानिकत्वात् पाठक्रमस्य अर्थाच्छ्रुतेः प्रत्यक्षत्वादिति शेषम्, प्रत्यक्षा हि श्रुतिः संस्थिते यज्ञे इति। पाठक्रमे त्वनुमानम्, अतोऽनेन क्रमेण पदार्था अनुष्ठेयाः यतोऽनेनैव क्रमेण पाठ इति। दुर्बलं च प्रत्यक्षादनुमानम्। अतः श्रुतिक्रमेणानुष्ठानमिति सिद्धम्। एवम् "तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियते" (श०ब्रा०४।१।५।१६) इत्येतदप्यत्रोदाहरणम् किं श्रुतिमन्त्रपाठात्तृतीयस्थाने गृह्यते? उत श्रुतिबलाद्दशमे? इति तत्र श्रुतिबलात्तु दशमे इति सिध्यति। अथ यत्र चोदनापाठक्रमस्य मन्त्रपाठक्रमस्य च परस्परं विरोधो भवति। यथाज्याधिश्रयणे "सोऽसावाज्यमधिश्रयतीषे त्वेति" धिश्रयणं विधाय तदनन्तरमेव "तत्पुनरुद्वासयत्यूर्जे त्वेति" (शत०ब्रा०१।२।२।६) चोदनापाठक्रमः। मन्त्रपाठे आज्याधिश्रयणमन्त्रानन्तरं "घर्मोऽसि विश्वायुरित्यादिम् (यजु० १।२२) पत्नीसंनहनमन्त्रान्तं मन्त्रगणं पठित्वा आज्योद्वासनमन्त्र "ऊर्जे त्वेति" पठितः। पूर्वाधिकरणे हि क्रमाच्छ्रुतेः प्रत्यक्षत्वाद्बलीयस्त्वमुक्तम् अत्रोभयोः प्रत्यक्षत्वात् किं चोदनापाठक्रमेणाज्योद्वासनं कर्त्तव्यमुत मन्त्रपाठक्रमेणेति संशये सत्याह" भा० "मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात्" ७सू०। "मन्त्रचोदनयोरिति मन्त्रपाठचोदनापाठयोर्विरोधे मन्त्रबलम् मन्त्रपाठएव बलवानित्यर्थः। कुतः? प्रयोगित्वात् मन्त्राणाम्, मन्त्रा हि कर्मकाले प्रयुज्यन्ते पठ्यन्ते न चोदनावाक्यानि अतो मन्त्रपाठः पदार्थानां सन्निकृष्टः चोदनापाठस्तु विप्रकृष्टः। तथा हि समिधो यजति" (शत०ब्रा०१।५।३।६।) इत्यनेन पदार्थो विहितः सोऽनुष्ठानवेलायां येन वाक्येन विहितस्तद्वाक्यं स्मारयति तेन वाक्येन स्मृतेनानुष्ठानवेलायां स्वपदार्थः स्मारितः सन्ननुष्ठीयते, इतीतरेतराश्रयं स्यात् अर्थेन वाक्यं स्मार्यते वाक्येन चार्थ इति नैष दोषः सामान्यविशेषभेदात् सामान्येन हि दार्शिकमङ्गं कर्त्तव्यमित्यवगम्यते विशेषस्मरणार्थं विधायकं वाक्यमालोचयति तेन चालोचितेन पश्चात्तदर्थविशेषः स्मारितोऽनुष्ठीयते अनुष्ठितस्त्वसौ झटित्येव द्वितीयं पदार्थं न स्मारयति अर्थानां ग्रन्थानपेक्षेण रूपेण पौर्वापर्य्यस्यानवक्लृप्तत्वात् किं तर्ह्यनुष्ठानोत्तरकालं योऽसौ कृतस्तमालोचयति समिद्यागोऽयं कृत इति स चालोच्यमानो येन समिधो यजतीत्यनेन (शतपथ)१।५।३।६। ब्राह्मणवाक्येन विहितस्तत्स्मारयति तच्च स्मृतं स्वादुत्तरम् "तनूनपातं यजतीत्येतत् स्मारयति कुतः? पाठात् ततः परं हि तत्पठितमिति तद्ब्राह्मणं पुनः पदार्थं विदधाति विधिरेव तस्य कार्य्यम् न स्मृतिः अनुष्ठानवेलायां तदेव ब्राह्मणं विधिव्यापारं कृत्वा चिरनिवृत्तव्यापारं प्रयोगकालाद्बहिर्भूतं स्मारकमपेक्षितम्। अयं मन्त्रपाठाद्ब्राह्मणपाठे विप्रकर्षः। मन्त्रः पुनरन्तःक्रतु प्रयुज्यमानः परिसमाप्यमान उत्तरं मन्त्रं पर्य्युपस्थापयति। स चोत्तरो मन्त्रः पर्य्युपस्थाप्य उत्तरं पदार्थं पर्य्युपस्थापयन्नेव पर्य्युपतिष्ठते। तस्मात्तत्रालोचनान्तरापेक्षाभावान्नास्ति विप्रकर्षः। एतदुक्तं भवति स्मारकक्रमेण तावदनुष्ठानक्रमः न च मन्त्रे अनन्यार्थे सति ब्राह्मणस्य स्मारकत्वम् अप्रयुज्यमानतया सामर्थ्याभावात्। न हि निर्वपामीतिवन्निर्वपेदिति पदमुच्चारितमनुष्ठानौपयिकमनुष्ठेयप्रकाशनं करोति किं तु सम्बन्धिमात्रतया प्रयोगबहिर्भूतं सत् अनेन वाक्येनेदं विहितमत एतत्करोमीत्येवमालोचनेन स्मारकं भवति। मन्त्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति सन्निकृष्टः। विप्रकृष्टाच्च सन्निकृष्टं बलवदित्येवं प्राप्ते आह" भाष्यम् "न समत्वात्" ८सू०। "मन्त्रपाठ एव बलवान् यदुक्तं तन्न कुतः? समत्वात् मन्त्रपाठचोदनापाठयोः। कथमुभयोः समता उच्यते मन्त्रः कर्मणि करिष्यमाणस्य कर्मणः स्मरणार्थं प्रयुज्यते, चोदना तु कर्मणो विधायिका अत एव चोदनायाः प्रवृत्तिः पूर्व्वम् यतः पदार्थे विहिते सति पश्चात्तत्स्मरणार्थं मन्त्रः प्रयुज्यते अतः सममेवैतदिति प्राप्ते सिद्धान्तमाह" भा० "गुणानां तु भूयस्त्वात्" ९सू० "तुशब्दः पूर्वपक्षनिरासार्थः। नैतदुभयं समम् किन्तु मन्त्रपाठ एव बलवान्। कुतः?